# 52 - द्विपञ्चाश दशकम्
# ब्रह्म गर्व शमनम्

अन्यावतार निकरेषु वनिरीक्षितं ते
भूमातिरेक मभि वीक्ष्य तदाघ मोक्षे ।
ब्रह्मा परीक्षितु मनास् स परोक्ष भावं
निन्येऽथ वत्सक गणान् प्रवितत्य मायाम् ॥ ॥52-1॥

वत्सा नवीक्ष्य विवशे पशुपोत्करे तान्
आनेतु काम इव धातृ मतानुवर्ती ।
त्वं सामिभुक्त कबलो गतवांस् तदानीं
भुक्तांस् तिरोऽधित सरोज भवः कुमारान् ॥ ॥52-2॥

वत्सायितस् तदनु गोपगणायितस् त्वं
शिक्यादि भाण्ड मुरली गवलादि रूपः ।
प्राग्वद् विहृत्य विपिनेषु चिराय सायं
त्वं माययाऽथ बहुधा व्रज माययाथ ॥ ॥52-3॥

त्वामेव शिक्य गवलादि मयं दधानः
भूयस् त्वमेव पशु वत्सक बाल रूपः ।
गो रूपिणीभि रपि गोप वधू मयीभिः
आसादितोऽसि जननीभि रति प्रहर्षात् ॥ ॥52-4॥

जीवं हि कञ्चि दभिमान वशात् स्वकीयं
मत्वा तनूज इति रागभरं वहन्त्यः ।
आत्मान मेव तु भवन्त मवाप्य सूनुं
प्रीतिं ययुर् न कियतीं वनिताश्च गावः ॥ ॥52-5॥

एवं प्रतिक्षण विजृम्भित हर्ष भार
निश्शेष गोप गण लालित भूरि मूर्तिम् ।
त्वा मग्रजोऽपि बुबुधे किल वत्सरान्ते
ब्रह्मात्मनो रपि महान् युवयोर् विशेषः ॥ ॥52-6॥

वर्षा वधौ नव पुरातन वत्स पालान्
दृष्ट्वा विवेक मसृणे द्रुहिणे विमूढे ।
प्रादीदृशः प्रति नवान् मकुटाङ् गदादि
भूषांश् चतुर्भुज युजस् सज लाम्बु दाभान् ॥ ॥52-7॥

प्रत्येक मेव कमला परिलालि ताङ्गान्
भोगीन्द्र भोग शयनान् नयनाभि रामान् ।
लीला निमीलित दृशस् सनकादि योगि
व्यासेवितान् कमलभूर् भवतो ददर्श ॥ ॥52-8॥

नारायणा कृति मसंख्य-तमां निरीक्ष्य
सर्वत्र सेवक मपि स्व मवेक्ष्य धाता ।
माया निमग्न हृदयो विमुमोह यावत्
एको बभूविथ तदा कबलार्ध पाणिः ॥ ॥52-9॥

नश्यन्मदे तदनु विश्व पतिं मुहुस् त्वाम्
नत्वा च नूतवति धातरि धाम याते ।
पोतैस् समं प्रमुदितैः प्रविशन् निकेतं
वातालयाधिप विभो परिपाहि रोगात् ॥ ॥52-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥